# A-I/1/22ADSS1CCTC1/23

**प्रथमसत्रार्द्धः**

**प्रथमपत्रम् (DSCC-16)**

**दर्शनम्**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नाः) × 02 (अङ्काः) = 20**

1. केषां तत्त्वज्ञानान्निःश्रेयसाधिगमः भवति?
2. न्यायः कस्मिन्नर्थे प्रवर्तते?
3. न्यायो नाम कः?
4. उपमानस्य किं लक्षणम्?
5. त्रिविधानि अनुमानानि कानि?
6. आत्मनः लिङ्गानि लिखत।
7. मनसः लिङ्गं किम्?
8. अपवर्गः कः?
9. कीदृशविमर्शः संशयः?
10. दृष्टान्तस्य किं लक्षणम्?
11. को नाम तर्कः?
12. छलं कतिविधम्?
13. आप्तोपदेशः कतिविधः?

**खण्डः – ख**

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नाः) × 05 (अङ्काः) = 20**

14. अवयवाः कति? स्वरूपं प्रदर्शयत।
15. सिद्धान्तो नाम कः? तस्य चातुर्विध्यं निरूपयत।

16. हेत्वाभासाः के? तेषां लक्षणानि सदृष्टान्तं निरूपयत।

17. येषामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः भवति तान् विवृणुत।

18. न्यायशास्त्रस्य प्रमेयाणि विवृणुत।

19. 'प्रवर्तनालक्षणा दोषाः' इति सूत्रं व्याख्यात।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ। 02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. न्यायशास्त्रे स्वीकृतानां प्रमाणानां स्वरूपं निरूपयत।

21. केषां तत्त्वज्ञानात् निःश्रेयसाधिगमो भवतीति प्रतिपादयत।

22. कथाः कतिविधाः? ताश्च काः? भाष्यदिशा विवृणुत।

# A-I/2/22ADSS1CCTC2/23

## प्रथमसत्रार्द्धः

## द्वितीयपत्रम् (DSCC-17)

## दर्शनम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. निःश्रेयसः सिद्धिः कस्माद् भवति?
2. कण्ठोक्ताः गुणाः कति?
3. अनुवृत्तिप्रत्ययकारणं किम्?
4. अयुतसिद्धाः के?
5. षण्णामपि पदार्थानां किं साधर्म्यम्?
6. कार्यत्वानित्यत्वे केषां साधर्म्ये?
7. पारिमाण्डल्यं नाम किम्?
8. तेजसः विषयाः कतिविधाः?
9. वायोः गुणाः के?
10. अपराजातिरहितानि द्रव्याणि कानि?
11. आत्मनः परिमाणं किम्?
12. अकारणगुणपूर्वकाः के?
13. परत्वं कतिविधम्?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. सामान्यस्वरूपं तद्द्वैविध्यं च प्रतिपादयत।
15. पृथिवीनिरूपणं कुरुत।

16. 'न्यायशास्त्रे सृष्टिप्रक्रिया' इति विषये टिप्पणीं लिखत।

17. परत्वापरत्वयोः निरूपणं यथाग्रन्थं कुरुत।

18. संशयस्वरूपं विवेचयत।

19. न्यायशास्त्रदृष्ट्या आत्मनः स्वरूपं विशदयत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. चतुर्णां महाभूतानां सृष्टिसंहारविधिं लिखत।

21. अनुमाननिरूपणं क्रियताम्।

22. गुणानां परस्परं साधर्म्यवैधर्म्यं ग्रन्थोक्तदिशा निरूपयत।

# A-I/3/22ADSS1CCTC3/23

**प्रथमसत्रार्द्धः**

**तृतीयपत्रम् (DSCC-18)**

**दर्शनम्**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. विदेहकैवल्यस्य उत्कर्षप्रतिपादकश्रुतिं लिखत।
2. बन्धस्य स्वाभाविकत्वे मोक्षस्य कीदृशम् अप्रामाण्यम्?
3. अतीन्द्रियाणां प्रतीतिः कस्माद् भवति?
4. प्रकृतेः अप्रत्यक्षत्वे किं कारणम्?
5. अविकारितत्त्वं किम्?
6. अहङ्कारात् केषां सृष्टिः भवति?
7. प्रकृतेः साधनं केन प्रमाणेन क्रियते?
8. सुखदुःखमोहाः केषां स्वभावः?
9. मूलाभावात् अमूलं किम्?
10. आद्यं कार्यं किम्?
11. प्रमालक्षणं लिखत।
12. अनुमानलक्षणगतप्रतिबन्धो नाम किम्?
13. अयुगपत्प्रवृत्तिः कस्य हेतुः?

**खण्डः – ख**

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. 'न नित्यशुद्धबुद्धमुक्तस्वभावस्य तद्योगः तद्योगादृते' सूत्रमिदं यथाभाष्यं व्याख्यात।
15. क्षणिकत्ववादं शून्यवादं च यथाभाष्यं निराकुरुत।

16. साङ्ख्योक्तजगत्सृष्टिप्रक्रियां विशदयत।
17. 'ततः प्रकृतेः' इति सूत्रं यथाभाष्यं व्याख्यात।
18. पुरुषास्तित्वसाधकन्यायं विशदयत।
19. सत्कार्यवादसाधकहेतून् विवृणुत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. 'न स्वभावतो बद्धस्य मोक्षसाधनोपदेशविधिः' सूत्रमिदं यथाभाष्यं विशदयत।
21. दुःखात्यन्तिकनाशं प्रति लौकिकवैदिकोपायानाम् असाधकत्वं प्रतिपादयत।
22. जगत्सृष्टिविषये साङ्ख्यानां परिणामवादं निरूपयत।